Reg. No. : ....................................

Name : .......................................

GOVT. BRENNEN COLLEGE THALASSERY CO-LIBRARY



**V Semester B.A. Degree (CCSS-Reg./Supple./Improv.)**
**Examination, November 2014**
**Core Course in Sanskrit**
**5B08 SKT : VEDA & UPANISHAT**

Time : 3 Hours                                                                 Max. Weightage : 30

***Instruction :*** *Answers should be written in **Sanskrit**. In writing **Sanskrit** **Devanagari** script should be used.*

I. कोष्ठात् समुचितं उत्तरं निर्धार्य लिखत I(Weightage **1** for **each**) **(3x1=3)**

1) a) वेदशब्द: कस्मात् धातो: उत्पन्न: ?
(विद्, वेद्, विद्वत्)

b) ऋग्वेदे कति अष्टका: सन्ति ?
(पञ्च, अष्टौ, नव)

c) ऋग्वेदे कति अध्याया: सन्ति ?
(पञ्चाशत् , अशीति:, चतुष्षष्टि)

d) अग्निसूक्ते प्रयुक्तं छन्द: किम् ?
(गायत्री, उष्णिक्, अनुष्टुप्)

2) a) इन्द्रस्य माहात्म्यं क: वर्णयति ?
(वसिष्ठ:, गृत्समद:, विश्वामित्र:)

b) उषस: कस्य दुहितृस्थानीया भवन्ति ?
(इन्द्रस्य, वरुणस्य, आदित्यस्य)

c) अक्षसूक्तमनुसृत्य द्यूतकरस्यकृते क: शब्द: प्रयुक्त: ?
(धूर्त:, कितव:, उद्धत:)

d) सवितृसूक्ते असुरशब्दस्य कोऽर्थ : ?
(दानव:, प्राणरक्षक:, राक्षस:)

3) a) वाजश्रवस: पुत्र: क: ?

(आरुणि:, नचिकेत:, उत्तङ्क:)

b) वाजश्रव: नचिकेतं कस्मै ददाति ?

(इन्द्राय, वरुणाय, यमाय)

c) प्रवचनेन अयं न लभ्य: क: ?

(ईश्वर:, यम:, आत्मा)

d) नचिकेत: मृत्युरहस्यं कं पृच्छति ?

(इन्द्रं, वरुणं, यमम्)

II. वाक्येनैकेन द्वयेन वा पञ्चानामुत्तरं लिखत।(Weightage **1** for **each**) (5×1=5)

4) ऋग्वेदस्य शाखानां नामानि लिखत

5) अध्वरं इत्यस्य कोऽर्थ: ?

6) यजुर्वेदीया: उपनिषद: के ?

7) रोदसी अभ्यसेतां इत्यस्य कोऽर्थ: ?

8) अग्नि: कै: स्तोतुं योग्यो भवति ?

9) मनस्वानित्यस्य क: आशय: ?

10) जनाय गातुं कृणवन्–आशयं विशदयत ।

11) अहस्तासो हस्तवन्तं सहन्ते इत्यस्य क आशय: ?

III. वाक्येनैकेन द्वयेन वा चतुर्णामुत्तराणि लिखत। (Weightage **1** for **each**) (4×1=4)

12) मृत्यवेत्वा दास्यामीति कदा वाजश्रवसा उक्तम् ?

13) कठोपनिषद: प्रतिपाद्यविषय: क: ?

14) तस्मात् त्रीन् वरान् वृणीष्व–केन कारणेन ?

15) कंमत्वा धीर: हर्षशोकौ जहाति ?

16) महान्तं विभुरात्मानं मत्वा धीरो न शोचति–कथम् ?

17) कीदृशमात्मानं भोक्ता इत्याहु: ?



IV. **द्वयो** : आशयं **एकैकया** खण्डिकया विशदयत। (Weightage **2** for **each**) (2×2=4)

18) अग्नि : पूर्वेभिरुषिभिरीड्यो नूतनैरुत ।
स देवाँ एहवक्षति ॥

19) यस्सप्तरश्मिर्वृषभस्तुविष्मानवासृजत् सर्तवे सप्तसिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्र : ॥

20) नीचावर्तन्त उपरिस्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अङ्गारा इरिणेन्युप्ताश्शीतास्सन्तो हृदयं निर्दहन्ति ॥

21) तिस्रो द्यावस्सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिंनरथ्यममृताधितस्थुरि हब्रवीतु य उतच्चिकेतत् ॥

V. **त्रयाणामुत्तरं** एकैकया खण्डिकया विशदयत । (Weightage **2** for **each**) (3×2=6)

22) यमेन प्रदत्तानि वराणि कानि ?

23) वास्तु मे वरणीय: स एव–क: वर: ?

24) तादृङ् नो भूयान्नचिकेत: प्रष्टा–कीदृक् ?

25) तदानन्त्याय कल्पते–किम् ?

26) अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् ।

तमक्रतु: पश्यति वीतशोको धातुप्रसादान्महिमानमात्मन: – व्याख्यात ।

VI. द्वे उपन्यस्यत : (Weightage **4** for **each**) (4×2=8)

27) इन्द्रसूक्तानुसारेण इन्द्रस्य स्वभावं वर्णयत।

**अथवा**

अक्षसूक्तस्य सामाजिकप्राधान्यं विशदयत ।

28) कठोपनिषदुक्तरीत्या आत्मनं स्वरूपं विशदयत ।

**अथवा**

कठोपनिषदुक्तरीत्या अग्निविद्याया: प्राधान्यं विशदयत ।

---